(x) अध्यापक के चले जाने पर हम सबने जल्दी-जल्दी यह काम पूरा किया और खाना खाकर खेलने के लिए कुछ ही दूर पर एक मैदान में चले गए।
After the teacher had left we all completed the work quickly and after taking our lunch, we went out to play in a playground not far away.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(xi) मैदान में खड़े मेरे मित्र ने आकाश की तरफ देखते हुए कहा, "जल्दी चलो! बारिश होने वाली है।"
Standing in the playground my friend said looking at the sky, "Let's go quickly; it's going to rain."

(xii) उसकी बात सुनते ही सभी ने ऊपर देखते हुए कहा, "सचमुच! आकाश बादलों से घिर गया है। हमें तुरन्त यहाँ से चले जाना चाहिए।" इतना कहते हुए हम सब तुरन्त वहाँ से दौड़ते हुए घर चले गए।
Hearing this everyone looked up and said, "True! Clouds have covered the sky. We have to go away from here immediately." Saying so we all went home running.

स्मरण कीजिए
Remember

(i) शतृ - गम् (पुंल्लिंगम्)
Śatṛ - Gam (Puṁlliṅgam) (Masculine)

विभक्ति Vibhakti	एकवचनम् Ēkavacanam	द्विवचनम् Dvivacanam	बहुवचनम् Bahuvacanam
प्रथमा Prathamā	गच्छन् Gacchan	गच्छन्तौ Gacchantau	गच्छन्तः Gacchantaḥ
द्वितीया Dvitīyā	गच्छन्तम् Gachantam	गच्छन्तौ Gacchantau	गच्छतः Gacchataḥ
तृतीया Tṛtīyā	गच्छता Gacchatā	गच्छद्भ्याम् Gacchadbhyām	गच्छद्भिः Gacchadbhiḥ
चतुर्थी Caturthī	गच्छते Gacchatē	गच्छद्भ्याम् Gacchadbhyām	गच्छद्भ्यः Gacchadbhyaḥ
पञ्चमी Pañcamī	गच्छतः Gacchataḥ	गच्छद्भ्याम् Gacchadbhyām	गच्छद्भ्यः Gacchadbhyaḥ

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

षष्ठी Ṣaṣṭhī	गच्छतः Gacchataḥ	गच्छतोः Gacchatōḥ	गच्छताम् Gacchatām
सप्तमी Saptamī	गच्छति Gacchati	गच्छतोः Gacchatōḥ	गच्छत्सु Gacchatsu
सम्बोधनम् Sambōdhanam	हे गच्छन्! Hē Gacchan!	हे गच्छन्तौ! Hē Gacchantau!	हे गच्छन्तः! Hē Gacchantaḥ!

(ii) क्तवतु - (गम्) (पुंल्लिंगम्)
Ktavatu - (Gam) (Puṁlliṅgam) (Masculine)

प्रथमा Prathamā	गतवान् Gatavān	गतवन्तौ Gatavantau	गतवन्तः Gatavantaḥ
द्वितीया Dvitīyā	गतवन्तम् Gatavantam	गतवन्तौ Gatavantau	गतवतः Gatavataḥ
तृतीया Tṛtīyā	गतवता Gatavatā	गतवद्भ्याम् Gatavadbhyām	गतवद्भिः Gatavadbhiḥ
चतुर्थी Caturthī	गतवते Gatavatē	गतवद्भ्याम् Gatavadbhyām	गतवद्भ्यः Gatavadbhyaḥ
पञ्चमी Pañcamī	गतवतः Gatavataḥ	गतवद्भ्याम् Gatavadbhyām	गतवद्भ्यः Gatavadbhyaḥ
षष्ठी Ṣaṣṭhī	गतवतः Gatavataḥ	गतवतोः Gatavatōḥ	गतवताम् Gatavatām
सप्तमी Saptamī	गतवति Gatavati	गतवतोः Gatavatōḥ	गतवत्सु Gatavatsu

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(iii) लुङ् लकारः (भू)
Luṅ Lakāraḥ (Bhū)

प्रथमः पुरुषः Prathamaḥ Puruṣaḥ	अभूत् Abhūt	अभूताम् Abhūtām	अभूवन् Abhūvan
मध्यमः पुरुषः Madhyamaḥ Puruṣaḥ	अभूः Abhūḥ	अभूतम् Abhūtam	अभूत Abhūta
उत्तमः पुरुषः Uttamaḥ Puruṣaḥ	अभूवम् Abhūvam	अभूव Abhūva	अभूम Abhūma

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एकविंशः पाठः
Ēkaviṁśaḥ Pāṭhaḥ

पाठ इक्कीस
Lesson-21

शब्दकोशः (*Śabda-kośaḥ* : Vocabulary)

अन्तिकम्	Antikam	पास	Near
अवध्य	Avadhya	न मारने योग्य	Not deserving to be killed
आहत	Āhata	दुःखी; नष्ट	Troubled; destroyed
कोप	Kōpa	क्रोध	Anger
उद्यत	Udyata	(हथियार से) धमकाये गये	Threatened
क्षुद्र	Kṣudra	छोय; साधारण	Small; little
चूर्णित	Cūrṇita	कुचले हुए	Crushed; stampeded
जिघ्रन् (घ्रा)	Jighran (Ghrā)	सूँघता हुआ	While smelling
तृषार्तः	Tṛṣārtaḥ	प्यासा; प्यास से परेशान	Thirsty; afflicted by thirst
तोयम्	Tōyam	पानी	Water
दूतः	Dūtaḥ	दूत	Messenger
निमज्जनार्थम्	Nimajjanārtham	स्नान के लिए	For taking a dip
निःसारित	Niḥsārita	बाहर किया गया	Forced out; expelled
प्रत्यहम्	Pratyaham	प्रतिदिन	Everyday

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रसाद्य	Prasādya	प्रसन्न करके	After pleasing; after passifying
प्रहसन्	Prahasan	हँसता हुआ	While laughing
प्रभृति	Prabhṛti	इत्यादि	Etc.
पिपासा	Pipāsā	प्यास	Thirst
प्रस्थापित	Prasthāpita	बाहर किया हुआ	Displaced; sent out
प्रसिद्धिः	Prasiddhiḥ	सर्वविदित	Popularity
प्रेषित	Prēṣita	भेजा गया	Sent; delegated
बिम्बम्	Bimbam	प्रतिछाया; छाया	Appearance, shadow
मृतप्राय	Mṛtaprāya	मृत्यु के कगार पर	Facing death; facing decimation
यथार्थवाचक	Yathārthavācaka	असलीयत बोलने वाला	Plain-speaker; telling the truth
यामः (या)	Yāmaḥ (Yā)	(हम) जाएँ	Should we go
यूथः	Yūthaḥ	झुण्ड	Herd
वचः	Vacaḥ	बात	Words; speech
वारान्तरम्	Vārāntaram	दूसरी बार; फिर	Again, another time
विधास्यते	Vidhāsyatē	होगा	Will occur; will happen
सम्बोधयिष्ये	Sambōdhayiṣyē	बात करूँ	Will I address/Will I talk to
ह्रदः	Hradaḥ	झील; तालाब	Pond; lake

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

द्वाविंशः पाठः — पाठ बाईस

Dvāviṁśaḥ Pāṭhaḥ — Lesson-22

प्रत्युत्पन्नमतिः वानरः (प्रथमो भागः)

Pratyutpannamatiḥ Vānaraḥ (Prathamō Bhāgaḥ)

चतुर वानर (भाग 1)

The Quick-witted Monkey (Part I)

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महाञ्जम्बूपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। तस्य तरोरधः कदाचित् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः – "भोः! भवान् समभ्यागतोऽतिथिः। तद् भक्षयतु मया दत्तान्यमृततुल्यानि जम्बूफलानि। उक्तं च–

प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः।
वैश्वदेवान्तम् आपन्नः सोऽतिथिः स्वर्गसङ्क्रमः।।

अन्यच्च –

दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतम्।
अतिथिं पूजयेद्यस्तु स याति परमां गतिम्।।

एवमुक्त्वा तस्मै जम्बूफलानि ददौ। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखम् अनुभूय भूयोऽपि स्वभवनमगात्। एवं नित्यमेव तौ वानरमकरौ जम्बूच्छायास्थितौ विविध–वार्ता–आलापैः कालं नयन्तौ सुखेन तिष्ठतः स्म। सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं नीत्वा स्वपत्न्याः प्रयच्छति। अथान्यतमे दिवसे तया स पृष्टः – "नाथ! क्वैवंविधान्यमृतफलानि प्राप्नोषि"? स आह, "भद्रे! ममास्ति परमसुहृद् रक्तमुखो नाम वानरः। स प्रीतिपूर्वकम् इमानि मृष्टफलानि मह्यं प्रयच्छति।" अथ तयाऽभिहितम् – "यः सदैव अमृतप्रायाणि ईदृशानि फलानि भक्षयति, तस्य हृदयम् अप्यमृतमयं भविष्यति। तद्यदि भार्यया ते प्रयोजनम्, ततस्तस्य मर्कटस्य हृदयं मह्यमानीय प्रयच्छ, येन तद्भक्षयित्वाऽहं जरामरणरहिता भूत्वा त्वया सह चिरं भोगान् भुञ्जे।" स आह– "भद्रे! मा मैवं वद! यतः प्रतिपन्नोऽस्माकं भ्राता, अपरं च फलदाता। ततोऽस्माभिः व्यापादयितुं न कदाऽपि शक्यते। तत्त्यजैनं मिथ्याग्रहम्। उक्तं च–

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एकं प्रसूयते माता द्वितीयं वाक्प्रसूयते।
वाग्जातमधिकं प्रोचुः सोदर्यादपि बन्धुवत्।।

अथ मकर्याह– "त्वया कदाचिदपि मम वचनं नान्यथा कृतम्। तन्नूनं सा वानरी भविष्यति, यतस्तस्या अनुरागतः सकलमपि दिनं तत्र गमयसि। ज्ञातं मया सत्यं सम्प्रति। यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतं विद्धि।"

"तत्किं करोमि। कथं स मे वध्यः स्यात्?" इति विचिन्त्य मकरः वानरपार्श्वम् अगात्। वानरोऽपि चिरादायान्तं तं सोद्वेगम् अवलोक्य प्रोवाच– "भो मित्र! किमद्य चिरवेलायां समागतोऽसि? कस्मात् खिन्न इव दृश्यसे?" सह आह – "मित्र! अहं तव भ्रातृजायया निष्ठुरैर्वाक्यैः भर्त्सितः – "भोः कृतघ्न! मा ते स्वमुखं दर्शय, यतस्त्वं प्रतिदिनं मित्रमुपजीवसि। न च तस्य पुनः प्रत्युपकारमपि करोषि। तेन हि अद्य तं मे देवरं नूनं गृहमानय येनाहं विशिष्टभोज्यालापैः तं प्रसादयामि" इति। तदहं तयैवं प्रोक्तस्तव सकाशमागतः। तदागच्छ मया सह। तव भ्रातृपत्नी त्वां द्रष्टुं सोत्सुकं मार्गमन्वेषयन्ती तिष्ठति।

[पंचतन्त्रम् – IV.1]

Pratyutpannamatiḥ Vānaraḥ (Prathamō Bhāgaḥ)

Asti kasmiṁścit samudrōpakaṇṭhē mahāñjambūpādapaḥ sadāphalaḥ. Tatra ca raktamukhō nāma vānaraḥ prativasati sma. Tasya tarōradhaḥ kadācit karālamukhō nāma makaraḥ samudrasalilānniṣkramya tīrōpāntē nyaviśat. Tataśca raktamukhēna sa prōktaḥ - "Bhōḥ! Bhavān samabhyāgatō"tithiḥ. Tadbhakṣayatu mayā dattānyamṛtatulyāni jambūphalāni. Uktaṁ ca-

Priyō vā yadi vā dvēṣyō mūrkhō vā yadi paṇḍitaḥ.
Vaiśvadēvāntam āpannaḥ sō'tithiḥ svargasaṅkramaḥ..

Anyacca-

Dūramārgaśramaśrāntaṁ vaiśvadēvāntamāgatam.
Atithiṁ pūjayēdyastu sa yāti paramāṁ gatim..

Ēvamuktvā tasmai jambūphalāni dadau. Sō'pi tāni bhakṣayitvā tēna saha ciraṁ gōṣṭhīsukham anubhūya bhūyō'pi svabhavanamagāt. Ēvaṁ nityamēva tau vānaramakarau jambūcchāyāsthitau vividha-vārtā-ālāpaiḥ kālaṁ nayantau sukhēna tiṣṭhataḥ sma. Sō'pi makarō bhakṣitaśēṣāṇi jambūphalāni gṛhaṁ nītvā svapatnyāḥ prayacchati. Athānyatamē divasē tayā sa pṛṣṭaḥ - "Nātha! kvaivaṁvidhān-yamṛtaphalāni prāpnōṣi?" Sa āha, "Bhadrē! Mamāsti paramasuhṛd Raktamukhō nāma vānaraḥ. Sa prītipūrvakam imāni mṛṣṭaphalāni mahyaṁ prayacchati." Atha tayā'bhihitam - "Yaḥ sadaiva amṛtaprāyāṇi īdṛśāni phalāni bhakṣayati, tasya

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

hṛdayam apyamṛtamayaṁ bhaviṣyati. Tadyadi bhāryayā tē prayōjanam, tatastasya markaṭasya hṛdayaṁ mahyamānīya prayaccha, yēna tadbhakṣayitvā'haṁ jarāmaraṇarahitā bhūtvā tvayā saha ciraṁ bhōgān bhuñjē." Sa āha - "Bhadrē! Mā maivaṁ vada! Pratipannō'smākaṁ bhrātā, aparaṁ ca phaladātā. Tatō'smābhiḥ vyāpādayituṁ na kadā'pi śakyatē. Tattyajainaṁ mithyāgrahaṇam. Uktaṁ ca-

Ēkaṁ prasūyatē mātā dvitīyaṁ vākprasūyatē;
Vāgjātamadhikaṁ prōcuḥ sōdaryādapi bandhuvat..

Atha makaryāha — "Tvayā kadācidapi mama vacanaṁ nānyathā kṛtam. Tannūnaṁ sā vānarī bhaviṣyati, yatastasyāḥ anurāgataḥ sakalamapi dinaṁ tatra gamayasi. Jñātaṁ mayā satyaṁ samprati. Yadi tasya hṛdayaṁ na bhakṣayāmi tanmayā prāyōpavēśanaṁ kṛtaṁ viddhi." "Tatkiṁ karōmi. Kathaṁ sa mē vadhyaḥ syāt?" Iti vicintya makaraḥ vānarapārśvam agāt. Vānarō'pi cirādāyāntaṁ taṁ sōdvēgam avalōkya prōvāca— "Bhō mitra! Kimadya ciravēlāyāṃ samāgatō'si? Kasmāt khinna iva dṛśyasē?" Sa āha - "Mitra! Ahaṁ tava bhrātṛjāyayā niṣṭhurairvākyaiḥ bhartsitaḥ - "Bhōḥ kṛtaghna! Mā tē svamukhaṁ darśaya, yatastvaṁ pratidinaṁ mitramupajīvasi. Na ca tasya punaḥ pratyupakāramapi karōṣi. Tēna hi adya taṁ mē dēvaraṁ nūnaṁ gṛhamānaya yēnāhaṁ viśiṣṭabhōjyālāpaiḥ taṁ prasādayāmī" iti. Tadahaṁ tayaivaṁ prōktastava sakāśamāgataḥ. Tadāgaccha mayā saha. Tava bhrātṛpatnī tvāṁ draṣṭuṁ sōtsukaṁ mārgamanvēṣayantī tiṣṭhati.

[Pañcatantram — IV.1]

चतुर वानर (भाग 1)

किसी समुद्र-तट पर हमेशा फलों से लदा रहने वाला जामुन का एक बड़ा पेड़ था। उस पर रक्तमुख नाम का बन्दर रहता था। उस पेड़ के नीचे एक दिन करालमुख नाम का मगरमच्छ समुद्र के पानी से निकलकर किनारे में आ गया। फिर रक्तमुख ने उससे कहा - "महोदय, आप अतिथि का स्वागत है। अतः मेरे द्वारा दिये जा रहे इन अमृतजैसे जामुनों का आस्वादन कीजिए। कहा भी गया है-

"चाहे वह हमारा प्रिय हो या शत्रु,
चाहे वह मूर्ख हो या विद्वान्,
वैश्वदेव-बलि की वेला में प्राप्त
अतिथि स्वर्ग की प्राप्ति कराता है।।"

और भी-

"दूर से थके-मांदे, पूजा की वेला में आए हुए

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अतिथि का जो व्यक्ति सम्मान करता है,
वह परम गति को प्राप्त करता है।"

ऐसा कहकर उसने उसको जामुन खाने को दिये। उनको खाकर वह भी देर तक उससे सुखपूर्वक बातचीत करता रहा, फिर अपने घर वापस चला गया। इसी प्रकार प्रतिदिन वे दोनों बन्दर और मगरमच्छ जामुन के पेड़ की छाया में बैठ कर बहुत सारी बातें करते हुए सुखपूर्वक अपना समय बिताते थे। वह मगरमच्छ भी बचे हुए जामुनों को घर ले जाकर अपनी पत्नी को देता था। फिर किसी रोज़ इसने उससे पूछा – "ये अमृत जैसे फल तुम्हें कहाँ से मिलते हैं?"

उसने कहा – "प्रिये! रक्तमुख नाम का एक बन्दर मेरा बहुत अच्छा मित्र है। वह प्यार से मुझे ये मीठे-मीठे फल देता है।" तब इसने कहा–

"जो इन अमृत जैसे फलों को हमेशा खाता है उसका कलेजा भी अमृत-जैसा ही होगा। इसलिए यदि तुम मुझे चाहते हो तो इस बन्दर का कलेजा लाकर मुझे दे दो जिससे कि मैं उसे खाकर बुढ़ापे और बीमारी से मुक्त हो कर लम्बे समय तक तेरे साथ सुख भोग सकूँ।"

उसने कहा– "प्रिये! ऐसा मत बोलो! क्योंकि वह मेरा भाग्य से प्राप्त बड़ा भाई है और दूसरा, वह उत्तम फल देने वाला है। इसीलिए उसका हम किसी भी प्रकार से वध नहीं कर सकते। अतः तुम अपने झूठे हठ को छोड़ दो। कहा भी गया है,

"एक भाई को तो माता जन्म देती है,
दूसरा भाई मधुर-वाणी से प्राप्त होता है;
मधुर-वाणी से प्राप्त बन्धु तो सहोदर भाई से भी अधिक श्रेष्ठ होता है।"

उसके बाद मगरमच्छ की पत्नी ने कहा – "तुमने पहले कभी भी मेरी बात नहीं टाली थी। निश्चय ही वह कोई बन्दरी होगी जिसके साथ तुम प्रेम-पूर्वक सारा दिन बिताते हो। मुझे अब सच्चाई का पता चल गया। यदि मुझे उसका कलेजा खाने को नहीं मिलेगा तो यह जान लो कि मैं आमरण उपवास करूँगी।" "अब मैं क्या करूँ? उसे मैं कैसे मारूँ", ऐसा सोचता हुआ मगरमच्छ बन्दर के पास गया। बन्दर ने भी उसे विलम्ब से आया हुआ तथा खिन्न देखकर कहा, "कहो मित्र! आज तुम इतनी देर से क्यों आये हो! क्यों दुःखी नज़र आ रहे हो?" उसने कहा – "मित्र! तुम्हारी भाभी ने मुझे बड़ी निर्दयता से यह कहकर फटकारा है – 'अरे कृतघ्न! तुम दुबारा मुझे अपना चेहरा मत दिखाना, क्योंकि तुम रोज़ अपने मित्र के दिये हुए पर निर्भर करते हो। उसके इस उपकार के बदले में कुछ भी नहीं करते हो! इसलिए मेरे उस देवर को तुम निश्चय ही आज घर ले आओ जिससे कि मैं विशेष भोजन तथा वार्तालाप से उनको खुश कर सकूँ।' उसके द्वारा इस प्रकार उलाहना दिये जाने पर मैं तुम्हारे पास आया

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हूँ। इसलिए अब तुम मेरे साथ चलो। तुम्हारी भाभी तुम्हारे दर्शन करने के लिए उत्सुक्ता के साथ तुम्हारी राह देख रही होगी।"

The Quick-witted Monkey (Part I)

There was once near the sea-shore a rose-apple tree always laden with fruits. On it lived a monkey by the name of Raktamukha. Once a crocodile named Karālamukha, coming out of the sea, lay down under that tree near the shore. He was then addressed thus by Raktamukha, "Oh Sir! You are most welcomed as a guest. Therefore kindly partake of these nectar-like rose-apples that are being offered by me. It is also said that,

"Dear or despised;
Fooslish or learned;
The guest who arrives
At the time of the Vaiśvadēva (ritual)
Opens for oneself the doors of heaven?

And also,

'One who at the time of the Vaiśvadēva (ritual)
Attends upon a guest coming from far, all-exhausted,
Attains salvation.'

Having said so, he offered him rose-apples. He too, having partaken of them chatted with him happily for a long time, and then went back to his place. In this manner, the duo monkey-crocodile, seated under the shadow of the rose-apple tree, used to pass their time joyfully everyday talking about various things.

The crocodile too, taking along with him the rose-apples remaining out of what were offered to him,, presented them to his wife. Thereafter, on a certain day, he was asked by her, "Lord! Wherefrom do you get these nectar-like fruits"? He said, "Dear! I have a very good friend, a monkey named Raktamukha. Everyday he offers to me these delicious fruits."

Thereafter he was thus requested by her,

"He who consumes nectar-like fruits of this kind everyday should be having a nectar-like heart also. Then, if you really care for your wife, then bring for me the heart of that monkey so that after consuming it I may become free from old-age and death and enjoy all types of pleasure with you for eternity."

He said —

"Dear! Don't talk like this! Because he is a new-found brother and also a

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

bestower of fruits for us. On no condition can he be killed by us. Therefore give up this evil demand. It has also been said that,

'One brother is born of the mother, one of kind words,
Of these two, the brother born of kind words is considered
More valuable than the brother born of the same mother"

Thereupon the female crocodile said:

"You had never before disregarded by wish. Surely she should be a female-monkey, for you are spending the whole day there out of love for her. If I don't get his heart for food, then be assured that I will fast till death."

"What should be done now? How is he to be killed by me?" So thinking the crocodile went to the monkey. The monkey too, seeing him coming late and all depressed, said:

"Oh friend, why are you so late today? Why do you look depressed like this?"

He said—

"Friend, I have been terribly rebuked by your sister-in-law thus, "Oh you ungrateful one! Do not show your face to me, for you are living everyday on the generosity of your friend. And you don't even do anything in return. Therefore today you have to bring home that brother-in-law of mine so that I may entertain him with special food and kind words." Being thus scolded by her I have come to you. Therefore come with me. Your sister-in-law is waiting anxiously to see you."

पदच्छेद: *(Padacchedaḥ)*-Disjunction of complex words

कस्मिंश्चित्	=	कस्मिन् + चित्
Kasmiṁścit	=	Kasmin + Cit
समुद्रोपकण्ठे	=	समुद्र + उप + कण्ठे = समुद्रस्य उपकण्ठे
Samudrōpakaṇṭhē	=	Samudra + Upa + Kaṇṭhē = Samudrasya upakaṇṭhē
महाञ्जम्बूपादपः	=	महान् + जम्बू + पादपः
Mahāñjambūpādapaḥ	=	Mahān + Jambū + Pādapaḥ
सदाफलः	=	सदा फलानि सन्ति यस्मिन् सः (पादपः) ।
Sadāphalaḥ	=	Sadā phalāni santi yasmin saḥ (pādapaḥ).
रक्तमुखः	=	रक्तं मुखं यस्य सः (वानरः)
Raktamukhaḥ	=	Raktaṁ mukhaṁ yasya saḥ (vānaraḥ)
तरोरधः	=	तरोः + अधः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Tarōradhaḥ	= Tarōḥ + Adhaḥ
करालमुखः	= करालं मुखं यस्य सः (मकरः)
Karālamukhaḥ	= Karālaṁ mukhaṁ yasya saḥ (makaraḥ)
समुद्रसलिलान्निष्क्रम्य	= समुद्रसलिलात् निष्क्रम्य
Samudrasalilānniṣkramya	= Samudrasalilāt niṣkramya
समुद्रसलिलम्	= समुद्रस्य सलिलम्
Samudrasalilam	= Samudrasya Salilam
तीरोपान्ते	= तीर + उप + अन्ते = तीरस्य उपान्ते
Tīrōpāntē	= Tīra + Upa + Antē = Tīrasya upāntē
समभ्यागतोऽतिथिः	= सम् + अभि + आगतः + अतिथिः
Samabhyāgatō'tithiḥ	= Sam + Abhi + Āgataḥ + Atithiḥ
तद्भक्षयतु	= तत् + भक्षयतु = तेन/तस्मात् भक्षयतु
Tadbhakṣayatu	= Tat + Bhakṣayatu = Tēna / Tasmāt bhakṣayatu
दत्तान्यमृततुल्यानि	= दत्तानि + अमृत + तुल्यानि
Dattānyamṛtatulyāni	= Dattāni + Amṛta + Tulyāni
अमृततुल्यानि	= अमृतस्य तुल्यानि (जम्बूफलानि)
Amṛtatulyāni	= Amṛtasya tulyāni (jmbūphalāni)
गोष्ठीसुखम्	= गोष्ठ्याः सुखम्
Gōṣṭhīsukham	= Gōṣṭhyāḥ sukham
जम्बूच्छायास्थितौ	= जम्बू + छाया + स्थितौ = जम्बूपादपस्य छायायां स्थितौ
Jambūcchāyāsthitau	= Jambū + Chāyā + Sthitau = Jambūpādapasya chāyāyāṁ sthitau
भक्षितशेषाणि	= भक्षितेभ्यः फलेभ्यः शेषम् अवशिष्टम् (फलम्) = भक्षितशेषम् (जम्बूफलम्), तानि
Bhakṣitaśēṣāṇi	= Bhakṣitēbhyaḥ phalēbhyaḥ śēṣam avaśiṣṭam (Phalam) = Bhakṣitaśēṣam (jambūphalam), Tāni
क्वैवंविधान्यमृतफलानि	= क्व + एवं + विधानि + अमृतफलानि
Kvaivaṁvidhānyamṛtaphalāni	= Kva + Ēvaṁ + Vidhāni + Amṛtaphalāni
अमृतफलानि	= अमृत इव फलानि
Amṛtaphalāni	= Amṛta iva phalāni
जरामरणरहिता	= जरा + मरण + रहिता
Jarāmaraṇarahitā	= Jarā + Maraṇa + Rahitā

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जरारहिता	=	जरया रहिता
Jarārahitā	=	Jarayā rahitā
मरणरहिता	=	मरणेन रहिता
Maraṇarahitā	=	Maraṇēna rahitā
तत्यजैनम्	=	तत् + त्यज + एनम् = तेन/तस्मात् त्यज एनम् (मिथ्या आग्रहणम्)
Tattyajainam	=	Tat + Tyaja + Ēnam = Tēna / tasmāt tyaja ēnam (mithyā āgrahaṇam)
मकर्याह	=	मकरी + आह
Makaryāha	=	Makarī + Āha
वानरपार्श्वम्	=	वानरस्य पार्श्वम्
Vānarapārśvam	=	Vānarasya pārśvam
चिरादायान्तम्	=	चिरात् + आयान्तम्
Cirādāyāntam	=	Cirāt + Āyāntam
सोद्वेगम्	=	स + उद्वेगम् = उद्वेगेन सहितम्
Sōdvēgam	=	Sa + Udvēgam = Udvēgēna sahitam
भ्रातृजायया	=	भ्रातृ + जायया = भ्रातुः जायया
Bhrātṛjāyayā	=	Bhrātṛ + Jāyayā = Bhrātuḥ jāyayā
विशिष्टभोज्यालापैः	=	विशिष्ट + भोज्य + आलापैः = विशिष्टैः भोज्यैः आलापैः च
Viśiṣṭabhōjyālāpaiḥ	=	Viśiṣṭa + Bhōjya + Ālāpaiḥ = Viśiṣṭaiḥ bhōjyaiḥ ālāpaiḥ Ca
भ्रातृपत्नी	=	भ्रातृ + पत्नी = भ्रातुः पत्नी
Bhrātṛpatnī	=	Bhrātṛ + Patnī = Bhrātuḥ patnī

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

द्वाविंशः पाठः | पाठ बाईस

Dvāviṁśaḥ Pāṭhaḥ | Lesson-22

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

1. निम्नलिखित प्रश्नों का संस्कृत में उत्तर दीजिए:-
Answer the following questions in Sanskrit:-

(i) समुद्रतटे कः कीदृशश्च वृक्षः आसीत्?
Samudrataṭē kaḥ kīdṛśaśca vṛkṣaḥ āsīt?

(ii) रक्तमुखः कः आसीत् स च कुत्र वसति स्म?
Raktamukhaḥ kaḥ āsīt sa ca kutra vasati sma?

(iii) रक्तमुखः तरुतले कं दृष्टवान् तं च किम् उक्तवान्?
Raktamukhaḥ tarutalē kaṁ drṣṭavān taṁ ca kim uktavān?

(iv) सखीभूतवानरमकरौ किं कुर्वन्तौ कालं नयतः स्म?
Sakhībhūtavānaramakarau kiṁ kurvantau kālaṁ nayataḥ sma?

(v) मकरः गृहं गत्वा स्वभार्यां किं कुर्वन् प्रसादयति स्म?
Makaraḥ gṛhaṁ gatvā svabhāryāṁ kiṁ kurvan prasādayati sma?

(vi) भक्षितानि जम्बूफलानि कीदृशानि अनुभूयन्ते स्म?
Bhakṣitāni jambūphalāni kīdṛśāni anubhūyantē sma?

(vii) मकरी किं विचारयन्ती वानरस्य हृदयं भक्षयितुम् ऐच्छत्?
Makarī kiṁ vicārayantī vānarasya hṛdayaṁ bhakṣayitum aicchat?

(viii) मकरेण किं ब्रुवता भार्यायाः प्रार्थना न स्वीकृता?
Makarēṇa kiṁ bruvatā bhāryāyāḥ prārthanā na svīkṛtā?

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(ix) किं ब्रुवन्त्या भार्यया मकरः भर्त्सितः?
Kiṁ bruvantyā bhāryayā makaraḥ bhartsitaḥ?

(x) मकरः किं चिन्तयन् वानरम् उपागच्छत्?
Makaraḥ kiṁ cintayan vānaram upāgacchat?

(xi) तं चिरादायान्तं दृष्ट्वा वानरः तं किम् उक्तवान्?
Taṁ cirādāyāntaṁ dṛṣṭvā vānaraḥ taṁ kim uktavān?

(xii) कृतघ्नः कः भवति? मकरी स्वभर्तारं कृतघ्नं उक्तवतीति किं सत्यम्? कथम्?
Kṛtaghnaḥ kaḥ bhavati? Makarī svabhartāraṁ kṛtaghnaṁ uktavatīti kiṁ satyam? Katham?

2. निम्नलिखित पद्यों/ पद्यांशों पर व्याकरण-सम्बन्धी टिप्पणी देते हुए उनका अर्थ स्पष्ट कीजिए:-

Explain clearly the meaning of the following words/phrases giving grammatical notes:

(a) ददौ, भवनमगात्, तिष्ठतः, प्राप्नोषि, भुनज्मि, शक्यते, गमयसि, विद्धि, प्रोवाच, पार्श्वमगात्, दर्शय, प्रसादयामि, प्रसूयते, भुङ्क्ते, भोजयति, तदागच्छ।
Dadau, Bhavanamagāt, Tiṣṭhataḥ, Prāpnōṣi, Bhunajmi, Śakyatē, Gamayasi, Viddhi, Prōvāca, Pārśvamagāt, Darśaya, Prasādayāmi, Prasūyatē, Bhuṅktē, Bōjayati, Tadāgaccha.

(b) जलस्थ, निष्क्रम्य, प्रोक्तः, दत्तानि, आपन्नः, अनुभूय, नयन्तौ, पृष्टः, अभिहितम्, आयान्तम्, समायातोऽसि, भक्षयित्वा, विचिन्त्य, वध्यः, गृहीत्वा,
Jalastha, Niṣkramya, Prōktaḥ, Dattāni, Āpannaḥ, Anubhūya, Nayantau, Pṛṣṭaḥ, Abhihitam, Āyāntam, Samāyātō'si, Bhakṣayitvā, Vicintya, Vadhyaḥ, Gṛhītvā.

(c) जम्बूपादपः, अमृततुल्यानि, भक्षितशेषाणि जम्बूफलानि, सदाफलः, जरामरणरहिता, वानरमकरौ, जम्बूच्छायास्थितौ, वाग्जातमधिकम्, चिन्ताव्याकुलितहृदयः, भ्रातृजाया, तदहम्, तदद्य, त्वदर्थे, प्रीतिलक्षणम्।
Jambūpādapaḥ, Amṛtatulyāni, Bhakṣitaśēṣāṇi Jambūphalāni, Sadāphalaḥ, Jarāmaraṇarahitā, Vānaramakarau, Jambūcchāyāsthitau, Vāgjātamadhikam, Cintāvyākulitahṛdayaḥ, Bhrātṛjāyā, Tadaham, Tadadya, Tvadarthē, Prītilakṣaṇam.

3. उपरिलिखित 2. (a), (b), (c) में दिये गये शब्दों से संस्कृत में 10 वाक्य लिखिए।
Write 10 sentences in Sanskrit with words taken from 2. (a), (b), (c) above.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

4. सूत्रोल्लेखपूर्वक सन्धिच्छेद कीजिए :-

Disjoin the following words mentioning the relevant Sandhi-sūtras :-

क्वैवंविधान्यमृतफलानि, सदैवामृतप्रायाणीदृशानि, तयैवम्, प्रीतिर्पूर्वकम्, ततस्तस्य, मैवं वद, तत्त्यजैनम्, बुद्धिर्यस्य, तरोरधः, सलिलान्निष्क्रम्य, तीरोपान्ते, ततश्च, तद्भक्षयतु, दत्तान्यमृततुल्यानि, सोऽतिथिः, वाग्जातम्, मकर्याह, तन्नूनम्, कदाचिदपि, तस्यास्तन्निश्चयं, वानरोऽपि, चिरादायान्तम्, प्रत्युपकारार्थम्, साध्विदम्, तदहम्, तदद्य, तदागच्छ, चैव।

Kvaivaṁvidhānyamṛtaphalāni, Sadaivāmṛtaprāyāṇīdṛśāni, Tayaivam, Prītirpūrvakam, Tatastasya, Maivaṁ Vada, Tattyajainam, Buddhiryasya, Tarōradhaḥ, Salilānniṣkramya, Tīrōpāntē, Tataśca, Tadbhakṣayatu, Dattānyamṛtatulyāni, Sō'tithiḥ, Vāgjātam, Makaryāha, Tannūnam, Kadācidapi, Tasyāstanniścayaṁ, Vānarō'pi, Cirādāyāntam, Pratyupakārārtham, Sādhvidam, Tadaham, Tadadya, Tadāgaccha, Caiva.

5. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए :-

Translate the following sentences into Sanskrit :-

(i) हे प्रभु! क्या आप बता सकते हैं कि ईश्वर साकार है या निराकार?
Oh Lord! Can you say whether God has a form or is He formless?

(ii) इस बच्चे की माँ वहाँ जा रही है; उससे कहो कि वह आकर अपने बच्चे को तुरन्त ले जाए।
This child's mother is going there; tell her to come and take away her child immediately.

(iii) जिस पेड़ की डालियों पर बन्दर रहता था उसी पेड़ के नीचे मगरमच्छ भी रहता था।
A crocodile also was staying under the tree on the branches of which a monkey was staying.

(iv) क्या तुम्हारे गुरु के चले जाने पर तुम भी चले गए थे?
Did you too go away on the departure of your teacher?

(v) उन शुत्रओं को मारने में केवल श्री राम जैसे वीर पुरुष ही समर्थ थे।
Only brave people like Lord *Rāma* were capable of killing those enemies.

(vi) मगरमच्छ की पत्नी बन्दर का हृदय खाना चाहती थी, परन्तु मगरमच्छ इससे खुश नहीं था क्योंकि बन्दर से उसकी दोस्ती हो गई थी।
The crocodile's wife wanted to eat the monkey's heart, but the crocodile was not happy with this because he had developed friendship with the monkey.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(vii) रात को हमारे मित्र के चले जाने पर हम भी काम रोककर अपने अपने घर चले गए।
On the departure of our friends at night we also stopped work and went home.

(viii) जिस पुस्तकालय में तुम बैठते हो क्या उसमें दूसरे लोग भी बैठ सकते हैं?
Can others also sit in the library where you sit?

(ix) यह काम इसी समय तुम लोगों को करना है; उसके बाद चाहो तो घर जा सकते हो या यहीं रहकर इन चित्रों को देख सकते हो।
You all have to do this work now itself; afterwards you may go home or stay here and look at these pictures.

(x) "किस तालाब में मगरमच्छ हैं?", उन लोगों ने डरते हुए हम लोगों से पूछा।
"In which lake are there corocodiles?," they asked us fearfully.

6. निम्नलिखित वाक्यों का हिन्दी में अनुवाद कीजिए :-
Translate the following sentences into English :-

(i) यदा मकरः नद्यां तरति स्म तदैव वानरः तस्मै मधुराणि जम्बूफलानि अयच्छत्।
Yadā makaraḥ nadyāṁ tarati sma tadaiva vānaraḥ tasmai madhurāṇi jambūphalāni ayacchat.

(ii) किम् अस्य तरोः अधस्तात् युष्माभिः किञ्चित् पतितं प्राप्तम् इति वृद्धजनेन वयं पृष्टाः।
Kim asya tarōḥ adhastāt yuṣmābhiḥ kiñcit patitaṁ prāptam iti vṛddhajanēna vayaṁ pṛṣṭāḥ.

(iii) अकस्मात् न किमपि कर्तव्यं वक्तव्यं वेति जनकेनोक्तम्।
Akasmāt na kimapi kartavyaṁ vaktavyaṁ vēti janakēnōktam.

(iv) साधोः पृष्ठतः तस्य शिष्योऽपि कानिचित् वस्तूनि नयन् गच्छति स्म।
Sādhōḥ pṛṣṭhataḥ tasya śiṣyō'pi kānicit vastūni nayan gacchati sma.

(v) न रात्रौ अधिकं जागरितव्यम् न च दिवसे शयितव्यम् इति मनुनोक्तम्।
Na rātrau adhikaṁ jāgaritavyam na ca divasē śayitavyam iti manunōktam.

(vi) न मे सम्प्रति विषयेऽस्मिन् काचित् विवक्षा वर्तते न चैवैतस्मिन् पुस्तके मे पिपठिषा वर्तते।
Na mē samprati viṣayē'smin kācit vivakṣā vartatē na caivaitasmin pustakē mē pipaṭhiṣā vartatē.

(vii) भक्ताः मन्दिरे देव्याः स्तुतिं कृत्वा तस्याः शास्त्र-रीत्या अर्चनां करिष्यन्तीति जननी उक्तवती।
Bhaktāḥ mandirē dēvyāḥ stutiṁ kṛtvā tasyāḥ śāstra-rītyā arcanāṁ kariṣyantīti jananī uktavatī.

(viii) वने जानक्याः अपहरणं कुर्वन्तं राक्षसं वीक्ष्य खगपतिः तं भृशम् अताडयत् अयुध्यत च।
Vanē Jānakyāḥ apaharaṇaṁ kurvantaṁ rākṣasaṁ vīkṣya Khagapatiḥ taṁ bhṛśam atāḍayat ayudhyata ca.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(ix) सीतापतिना रामेण जानकीं रक्षसः उद्धर्तुं सलक्ष्मणवानरसेनां पुरस्कृत्य तमयुध्यत जघान च।
Sītāpatinā Rāmēṇa Jānakīṁ rakṣasaḥ uddhartuṁ sa-Lakṣmaṇavānarasēnāṁ puraskṛtya tamayudhayata jaghāna ca.

(x) श्रीरामेणादिष्टेन लक्ष्मणेनापि वानरसेनासाहाय्येन मेघनादसहितम् अनेके राक्षसाः हताः।
Śrīrāmēṇādiṣṭēna Lakṣmaṇēnāpi vānarasēnāsāhāyyēna Mēghanāda-sahitam anēkē rākṣasāḥ hatāḥ.

स्मरण कीजिए (Remember)

(I) शानच् - (वन्द्) - (पुंल्लिगम्)
Śānac - (Vand) - (Puṁlliṅgam)

प्रथमा Prathamā	वन्दमानः Vandamānaḥ	वन्दमानौ Vandamānau	वन्दमानाः Vandamānāḥ
द्वितीया Dvitīyā	वन्दमानम् Vandamānam	वन्दमानौ Vandamānau	वन्दमानान् Vandamānān
तृतीया Tṛtīya	वन्दमानेन Vandamānēna	वन्दमानाभ्याम् Vandamānābhyām	वन्दमानैः Vandamānaiḥ
चतुर्थी Caturthī	वन्दमानाय Vandamānāya	वन्दमानाभ्याम् Vandamānābhyām	वन्दमानेभ्यः Vandamānēbhyaḥ
पञ्चमी Pañcamī	वन्दमानात् Vandamānāt	वन्दमानाभ्याम् Vandamānābhyām	वन्दमानेभ्यः Vandamānēbhyaḥ
षष्ठी Ṣaṣṭhī	वन्दमानस्य Vandamānasya	वनदमानयोः Vandamānayōḥ	वन्दमानानाम् Vandamānānām
सप्तमी Saptamī	वन्दमाने Vandamānē	वनदमानयोः Vandamānayōḥ	वन्दमानेषु Vandamānēṣu
सम्बोधनम् Sambōdhanam	हे वन्दमान! Hē Vandamāna!	हे वन्दमानौ! Hē Vandamānau!	हे वन्दमानाः! Hē Vandamānāḥ!

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(II) वन्द् - (आत्मनेपद) - लट्लकारः
Vand– (Ātmanēpada) – Laṭlakāraḥ

प्रथमः पुरुषः Prathamaḥ Puruṣaḥ	वन्दते Vandatē	वन्देते Vandētē	वन्दन्ते Vandantē
मध्यमः पुरुषः Madhyamaḥ Puruṣaḥ	वन्दसे Vandasē	वन्देथे Vandēthē	वन्दध्वे Vandadhvē
उत्तमः पुरुषः Uttamaḥ Puruṣaḥ	वन्दे Vandē	वन्दावहे Vandāvahē	वन्दामहे Vandāmahē

(III) (गम् + यक्) (भाववाच्य :) - लट्लकारः
(Gam+Yak) (Bhāvavācyaḥ - Passive Voice) - Laṭlakāraḥ (Present Tense)

प्रथमः पुरुषः Prathamaḥ Puruṣaḥ	गम्यते Gamyatē	गम्येते Gamyētē	गम्यन्ते Gamyantē
मध्यमः पुरुषः Madhyamaḥ Puruṣaḥ	गम्यसे Gamyasē	गम्येथे Gamyēthē	गम्यध्वे Gamyadhvē
उत्तमः पुरुषः Uttamaḥ Puruṣaḥ	गम्ये Gamyē	गम्यावहे Gamyāvahē	गम्यामहे Gamyāmahē

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

द्वाविंशः पाठः — पाठ बाईस

Dvāviṁśaḥ Pāṭhaḥ — **Lesson-22**

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

1. निम्नलिखित प्रश्नों का संस्कृत में उत्तर दीजिए:-
Answer the following questions in Sanskrit:-

(i) समुद्रतटे कः कीदृशश्च वृक्षः आसीत्?
Samudrataṭē kaḥ kīdṛśaśca vṛkṣaḥ āsīt?

(ii) रक्तमुखः कः आसीत् स च कुत्र वसति स्म?
Raktamukhaḥ kaḥ āsīt sa ca kutra vasati sma?

(iii) रक्तमुखः तरुतले कं दृष्टवान् तं च किम् उक्तवान्?
Raktamukhaḥ tarutalē kaṁ dṛṣṭavān taṁ ca kim uktavān?

(iv) सखीभूतवानरमकरौ किं कुर्वन्तौ कालं नयतः स्म?
Sakhībhūtavānaramakarau kiṁ kurvantau kālaṁ nayataḥ sma?

(v) मकरः गृहं गत्वा स्वभार्यां किं कुर्वन् प्रसादयति स्म?
Makaraḥ gṛhaṁ gatvā svabhāryāṁ kiṁ kurvan prasādayati sma?

(vi) भक्षितानि जम्बूफलानि कीदृशानि अनुभूयन्ते स्म?
Bhakṣitāni jambūphalāni kīdṛśāni anubhūyantē sma?

(vii) मकरी किं विचारयन्ती वानरस्य हृदयं भक्षयितुम् ऐच्छत्?
Makarī kiṁ vicārayantī vānarasya hṛdayaṁ bhakṣayitum aicchat?

(viii) मकरेण किं ब्रुवता भार्यायाः प्रार्थना न स्वीकृता?
Makarēṇa kiṁ bruvatā bhāryāyāḥ prārthanā na svīkṛtā?

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्व	Kva	कहाँ	Where
खिन्नः	Khinnaḥ	मायूस	Dejected; sad
गोष्ठीसुख	Gōṣṭhī-sukha	साथ होने का सुख	Pleasure of company
जरा	Jarā	बुढ़ापा	Old age
तीरोपान्त	Tīrōpānta	तट के पास	Near the bank (of the river/sea)
त्वद्	Tvad	तुम	You
त्वदर्थम्	Tvadartham	तेरे लिए	For you
देवरः	Dēvaraḥ	पति का भाई	Husband's brother; brother-in-law
द्वेष्यः	Dvēṣyaḥ	शत्रु	Enemy
निष्क्रम्	Niṣkram	बाहर निकलना	To get out; to come out
नूनम्	Nūnam	निश्चय ही	Surely
भर्त्स्	Bharts	घृणा करना	To despise; to hate
भार्या	Bhāryā	पत्नी	Wife
भुनज्मि (भुज्)	Bhunajmi (Bhuj)	खाऊँ	I may eat
भृशम्	Bhṛśam	अत्यधिक; बुरी तरह से	Excessively; badly
भोज्य	Bhōjya	खाने की चीज़/ खाना	Food; food stuff
भक्षितशेषः	Bhakṣitaśēṣaḥ	खाने के बाद बचा हुआ	Left over

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भ्रातृजाया/भ्रातृभार्या /भ्रातृपत्नी	Bharātṛjāyā/ Bhrātṛbhāryā/ Bhrātṛpatnī	भाई की पत्नी, भाभी	Sister-in-law; brother's wife
प्रत्युत्पन्नमतिः	Pratyutpan-namatiḥ	तेज बुद्धि वाला; चतुर	intelligent; ready-witted; quick-witted
पादपः	Pādapaḥ	पेड़	Tree
पार्श्वम्	Pārśvam	पास	Near; onto
पिपासा	Pipāsā	पीने की इच्छा; प्यास	Desire to drink; thirst
पिपठिषा	Pipaṭhiṣā	पढ़ने की इच्छा	Desire to read
प्रतिपन्न	Pratipanna	प्राप्त किया हुआ	Acquired
प्रसूयते	Prasūyatē	जन्म देती है	Gives birth to
प्रायोपवेशः	Prāyōpavēśaḥ	आमरण उपवास	Fast unto death
प्रोक्तः	Prōktaḥ	कहा हुआ	Addressed
मकरः	Makaraḥ	मगरमच्छ	Crocodile
मर्कटः	Markaṭaḥ	बन्दर	Monkey
मरणम्	Maraṇam	मृत्यु	Death
मिथ्या	Mithyā	झूठ	False
मृष्टफल	Mṛṣṭaphala	स्वादिष्ट फल	Delicious fruit
वध्यः	Vadhyaḥ	मारने योग्य	Deserving to be killed
विद्धि (विद्)	Viddhi (Vid)	जानो	Know
विशिष्ट	Viśiṣṭa	खास	Special
वेला	Vēlā	समय	Time

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्यापादय्	Vyāpāday	मार डालना	To kill
श्रमः	Śramaḥ	परिश्रम; प्रयत्न	Hard work; effort
श्रान्तः	Śrāntaḥ	थका हुआ	Tired
शयितव्यम् (शी+तव्यत्)	Śayitavyam (Śī+Tavyat)	सोना चाहिए	Should sleep
सकाशम्	Sakāśam	पास	Near
सदाफलः	Sadāphalaḥ	हमेशा फल देने वाला	Ever fruit-yielding
सलिलम्	Salilam	पानी	Water
सोदर्यादपि	Sōdaryādapi	सगे भाई से भी (अधिक)	(More) than a brother

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्रयोविंशः पाठः — पाठ तेईस

Trayōviṁśaḥ Pāṭhaḥ — Lesson-23

प्रत्युत्पन्नमतिः वानरः (द्वितीयो भागः)

Pratyutpannamatiḥ Vānaraḥ (Dvitīyō Bhāgaḥ)

चतुर बन्दर (भाग 2)

The Quick-Witted Monkey (Part II)

मर्कट आह, "भोः मित्र! युक्तमभिहितं मद्भ्रातृपत्न्या।

उक्तं च–

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।।

परं वयं वानराः स्थले चरामः युष्मदीयं च जलान्तरे गृहम्। तत्कथं शक्यते तत्र गन्तुं मया। तस्मात् सा मे भ्रातृपत्नी अत्रैव आनेतव्या येन प्रणम्य तस्या आशीर्वादं गृह्णामि।" स आह, "भोः मित्र! अस्ति समुद्रान्तरे सुरम्ये पुलिनप्रदेशेऽस्मद्गृहम्। तन्मम पृष्ठमारुह्य सुखेनागच्छ त्वम्।" सोऽपि तच्छ्रुत्वा विश्वस्य च सानन्दमाह, "भद्र! यद्येवं तत्किं विलम्ब्यते। त्वर्यताम्। एषोऽहं तव पृष्ठमारूढः।" तथानुष्ठितेऽगाधे जलधौ शीघ्रेण गच्छन्तं मकरमालोक्य वानरः सभयमब्रवीत् – "भ्रातः! शनैः शनैर्गम्यताम्। जलकल्लोलैः प्लाव्यते मे शरीरम्।" तदाकर्ण्य मकरः अचिन्तयत् – 'असावगाधं जलं प्राप्तो मे वशं सञ्जातः। मत्पृष्ठगतस्सः तिलमात्रमपि चलितुं न शक्नोति। तस्मात् कथयाम्यहं निजाभिप्रायं येन स स्वाभीष्टदेवतां स्मरेत्।' आह च– "मित्र! त्वं मया वधाय समानीतो भार्यावचनेन विश्वास्य। तत्स्मर्यतामभीष्टदेवता।" तच्छ्रुत्वा वानरः सोद्वेगमाह– "भ्रातः! मया किं तव वा तस्याः वा अपकृतं येनाहं वधार्हः अभूवम्?" मकर आह – "भोः! अस्तीदं तव स्नेहफलम्। यतो हि त्वदर्पितानि स्वादुफलानि भक्षयित्वा तस्याः ते भ्रातृभार्यायाः तवैव मृष्टहृदयामृतम् आस्वादयितुम् इच्छा सञ्जाता। तेनैव मयेदमनुष्ठितम्।" तच्छ्रुत्वा किञ्चित् विचिन्त्य स

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्युत्पन्नमतिर्मर्कटोऽब्रवीत् – "भद्र! यद्येवं तत्किं त्वया नाभिहितं पूर्वम्। अहं सदैव स्वहृदयं जम्बूकोटरे सुगुप्तं स्थापयामि। सम्प्रति शून्यहृदयोऽहं त्वयात्रानीतः। तर्हि परावर्त्य जम्बूपादपं पुनरपि मां नय येन स्वहृदयमानीय भ्रातृपत्न्या अर्पयामि।" तदाकर्ण्य मकरः सानन्दमाह– "भद्र! यद्येवं त्वामहं सम्प्रत्येव जम्बूपादपं प्रापयामि।" एवमुक्त्वा निवर्त्य स जम्बूतलमगात्। वानरोऽपि तीरमासाद्य झटिति जम्बूपादपमारुह्य चिन्तितवान् –

'अहो! दिष्ट्या पुनर्जीवामि साम्प्रतम्। अथवा साध्विदमुच्यते –

न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत्।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति।।

तन्ममैतदद्य पुनर्जन्मदिनमिव सञ्जातम्।' इत्येवं चिन्तयमानं तं मर्कटं दृष्ट्वा मकर आह – "भो मित्र! अर्पय तद्धृदयं यथा ते भ्रातृपत्नी तत् भक्षयित्वा सन्तुष्टा भवेत्।" अथ विहस्य तं भर्त्सयन् वानरस्तमाह– "धिग्धिङ्मूर्ख विश्वासघातक! किं कस्यचिद्धृदयद्वयं भवति? तदाशु गम्यतां न पुनरपि त्वयात्र आगन्तव्यम्। उक्तं च–

योऽमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः।
स करोति न सन्देहः स्वयं हि विषभक्षणम्।।"

[पंचतन्त्रम् – IV.1]

Pratyutpannamatiḥ Vānaraḥ (Dvitīyō Bhāgaḥ)

Markaṭa āha - "Bhōḥ mitra! yuktamabhihitaṁ madbhrātṛpatnyā. uktaṁ ca—
Dadāti pratigṛhṇāti guhyamākhyāti pṛcchati.
Bhuṅktē bhōjayatē caiva ṣaḍvidhaṁ prītilakṣaṇam.

Paraṁ vayaṁ vānarāḥ sthalē carāmaḥ yuṣmadīyaṁ ca jalāntarē gṛham. Tatkathaṁ śakyatē tatra gantuṁ mayā. Tasmāt sā mē bhrātṛpatnī atraiva ānētavyā yēna praṇamya tasyā āśīrvādaṁ gṛhṇāmi". Sa āha—"Bhōḥ mitra! Asti Samudrāntarē suramyē pulinapradēśē'smadgṛham. Tanmama pṛṣṭhamāruhya sukhēnāgaccha tvam". Sō'pi tacchrutvā viśvasya ca sānandamāha—"Bhadra! Yadyēvaṁ tatkiṁ vilambyatē. Tvaryatām. Ēṣō'haṁ tava pṛṣṭhamārūḍhaḥ." Tathānuṣṭhitē'gādhē jaladhau śīghrēṇa gacchantaṁ makaramālōkya vānaraḥ sabhayamabravīt—"Bhrātaḥ! Śanaiḥ śanairgamyatām. Jalakallōlaiḥ plāvyatē mē śarīram." Tadākarṇya makaraḥ acintayat — "Asāvagādhaṁ

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

jalaṁ prāptō mē vaśaṁ sañjātaḥ. Matpṛṣṭhagatassaḥ tilamātramapi calituṁ na śaknōti. Tasmāt kathayāmyahaṁ nijābhiprāyaṁ yēna sa svābhīṣṭadēvatāṁ smarēt". Āha ca— "Mitra! Tvaṁ mayā vadhāya samānītō bhāryāvacanēna viśvāsya. Tatsmaryatāmabhīṣṭdēvatā." Tacchrutvā vānaraḥ sōdvēgamāha— "Bhrātaḥ! Mayā kiṁ tava vā tasyāḥ vā apakṛtaṁ yēnāhaṁ vadhārhaḥ abhūvam?" Makara āha— "Bhōḥ! Astīdaṁ tava snēha-phalam. Yatō hi tvadarpitāni svāduphalāni bhakṣayitvā tasyāḥ tē bhrātṛbhāryāyāḥ tavaiva mṛṣṭahṛdayāmṛtam āsvādayitum icchā sañjātā. Tēnaiva mayēdamanuṣṭhitam." Tacchrutvā kiñcit vicintya sa pratyupannamatirmarkaṭō'bravīt." Bhadra! Yadyēvaṁ tatkiṁ tvayā nābhihitaṁ pūrvam. Ahaṁ sadaiva svahṛdayaṁ jambūkōṭarē suguptaṁ sthāpayāmi. Samprati śūnyahṛdayō'haṁ tvayātrānītaḥ. Tarhi parāvartya jambūpādapaṁ punarapi māṁ naya yēna svahṛdayamānīya bhrātṛpatnyā arpayāmi." Tadākarṇya makaraḥ sānandamāha—"Bhadra! Yadyēvaṁ tvāmahaṁ sampratyēva jambūpādapaṁ prāpayāmi." Ēvamuktvā nivartya sa jambūtalamagāt. Vānarō'pi tīramāsādya jhaṭiti jambūpādapamāruhya cintitavān. "Ahō! Diṣṭyā punarjīvāmi sāmpratam. Athavā sādhvidamucyatē—

Na viśvasēdaviśvastē viśvastē'pi na viśvasēt.
Viśvāsād bhayamutpannaṁ mūlānyapi nikṛntati..

Tanmamaitadadya punarjanmadinamiva sañjātam." Ityēvaṁ cintayamānaṁ taṁ markaṭaṁ dṛṣṭvā makara āha—"Bhō mitra! Arpaya taddhṛdayaṁ yathā tē bhrātṛpatnī bhakṣayitvā santuṣṭā bhavēt." Atha vihasya taṁ bhartsayan vānarastamāha—"Dhigdhiṅmūrkha viśvāsaghātaka! Kiṁ kasyaciddhṛdaya-dvayaṁ bhavati? Tadāśu gamyatāṁ na punarapi tvayātra āgantavyam. Uktaṁ ca—

"Yō'mitraṁ kurutē mitraṁ vīryābhyadhikamātmanaḥ.
Sa karōti na sandēhaḥ svayaṁ hi viṣabhakṣaṇam.."

[Pañcatantram-IV.1]

चतुर बन्दर (भाग 2)

बन्दर ने कहा –

"मित्र! मेरी भाभी ने ठीक ही कहा है। कहा भी गया है,
देना-लेना, गुप्त बात करना, हाल-चाल पूछना,
तथा खाना-खिलाना- ये परस्पर-प्रेम के छः लक्षण हैं।"

"परन्तु हम बन्दर ज़मीन पर चलने वाले हैं और तुम्हारा घर तो पानी के अन्दर है। फिर मैं वहाँ कैसे

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जा सकूँगा? इसलिए मेरी भाभी को तुम यहीं ले आओ जिससे कि मैं उनको प्रणाम करके आशीर्वाद प्राप्त कर सकूँ।" उसने कहा – "मित्र! मेरा घर तो समुद्र के अन्दर एक सुन्दर रेतीले स्थल पर पाया जाता है। इसलिए तुम मेरी पीठ पर चढ़कर आराम से चलो।" यह सुनकर उसने भी विश्वास करके खुश होकर कहा – "प्यारे दोस्त! यदि ऐसी बात है तो देर किस बात की? जल्दी करो; अभी मैं तेरी पीठ पर बैठता हूँ।"

ऐसा हो जाने पर गहरे समुद्र में तेज़ी से जाते हुए मगरमच्छ को देखकर बन्दर ने डरता हुआ कहा, "बन्धु! धीरे-धीरे चलो! मेरा शरीर पानी के झोंकों से भीग रहा है।" यह सुनकर मगरमच्छ सोचने लगा – "यह (बन्दर) तो इस गहरे समुद्र के बीच में पड़ा पूरी तरह से मेरे वश में है। मेरी पीठ पर पड़ा हुआ वह खिसक भी नहीं सकता है। इसलिए मैं इसको अपना इरादा बताये देता हूँ ताकि वह अपने इष्टदेव को (अन्तिम) प्रणाम कर सके।" फिर उसने कहा – "मित्र! मैं तो भाभी के कहने पर विश्वास दिलाकर तुझे मार डालने के लिए अपने साथ लाया हूँ। इसलिए अब तुम अपने इष्टदेव को स्मरण करो।" यह सुनकर बन्दर ने घबराकर कहा – "बन्धु! मैंने तेरा या उसका क्या बिगाड़ा है जो मुझे मौत की सज़ा मिल रही है?" मगरमच्छ ने कहा – "अरे! यह तो तेरे स्नेह का फल है! क्योंकि तेरे ही दिये हुए स्वादिष्ट फलों को खाने के बाद तेरी भाभी को अब तेरे ही स्वादिष्ट हृदय खाने की इच्छा हुई है। इसलिए मुझे ऐसा करना पड़ा।" यह सुनकर कुछ देर विचार करके उस चतुर बन्दर ने कहा, "मित्र! यदि ऐसी बात है तो तुम ने पहले क्यों नहीं कहा? मैं तो हमेशा अपना कलेजा जामुन के पेड़ पर छिपा कर रखता हूँ। इस समय तुम मुझे कलेजे के बिना ही यहाँ ले आए हो। इस लिए मुझे उस जामुन के पेड़ तक वापस ले चलो जिससे कि मैं अपना कलेजा ले आऊँ और भाभी को भेंट करूँ।" यह सुनकर मगरमच्छ ने खुश होकर कहा – "मित्र! यदि ऐसा है तो लो, मैं तुझे इसी समय जामुन के पेड़ तक वापस ले जाता हूँ।" ऐसा कहकर वह घूमकर जामुन के पेड़ के पास वापस आ गया। बन्दर भी तट पर पहुँचते ही छलाँग मारकर जामुन के पेड़ पर चढ़ गया और सोचने लगा – "सौभाग्य से मैं इस समय ज़िन्दा वापस आया हूँ। नहीं तो यह ठीक ही कहा गया है–

"अविश्वसनीय पर विश्वास नहीं करना चाहिए,
विश्वास दिलाने वाले पर भी विश्वास नहीं करना चाहिए;
(क्योंकि) विश्वास करने से उत्पन्न भय जड़ को भी काट डालता है।"

"आज का यह दिन तो मेरे लिए पुनर्जन्म का दिन जैसा है।" इस प्रकार बन्दर को विचारों में डूबे हुए देखकर मगरमच्छ ने कहा – "मित्र! अपना वह कलेजा अब मुझे दे दो जिसे खाकर तेरी भाभी सन्तुष्ट हो जाए।" उसके बाद हँसकर और उसे दुत्कारते हुए बन्दर ने कहा – विश्वासघात! धिक्कार है

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तुझे! अरे मूर्ख क्या किसी के भी दो कलेजे होते हैं? इसलिए तू तुरन्त यहाँ से चला जा और दुबारा यहाँ मत आना। कहा भी गया है–

"जो व्यक्ति अपने से बलवान् शत्रु के साथ मित्रता करता है, वह निःसंदेह खुद ही ज़हर खाता है।"

The Quick-witted Monkey (Part 2)

The monkey said, "Friend, my sister-in-law is right. (For) this has been said (in this context):"

"Giving, taking, confidence-sharing, enquiring (about health)
Eating together and guest-hosting-
These are the six signs of mutual-love."

But we monkeys move on land while your home is in water. Then how will I be able to go there? Therefore, you ought to bring my sister-in-law here itself so that I may offer her my respects and obtain her blessings."

He said, "Friend, my home is to be found on a beautiful sandy-place inside the sea. Therefore sit on my back; I'll take you there without any difficulty."

Hearing this, and trusting him, he said joyfully "My dear! If this is so, then why delay. Let's go immediately. Here do I climb your back."

This being done, seeing the crocodile moving fast in the deep ocean, the monkey said fearfully, "Brother! Kindly go slowly! My body is getting drenched with the waves."

Hearing this, the crocodile thought, "This fellow is now in my grip being caught in the middle of deep water. Seated on my back he won't be able to move even an inch. Then let me tell him my actual design so that he may say his last prayers."

He then said, - "Friend! Having gained your confidence, on my wife's order, I have brought you here to be slaughtered. Therefore say your last prayers!"

Hearing this, the monkey said anxiously, "Brother! What wrong did I do to you or to her due to which I deserve to be killed?" The crocodile said, "Dear, this is the fruit of your friendship. Because, having tasted the delicious fruits offered by you, your sister-in-law longs now to taste the nectar of your sweet heart itself. This is why I have had to act like this."

Hearing this and after thinking for a while, the quick-witted monkey said:

"Dear! If this is so, why you did not tell me earlier? I always keep my heart in a secret place on the rose-apple tree. I have been brought here presently by you devoid of my heart. Therefore take me back to the rose-apple tree so that I may bring my heart and offer it to my sister-in-law."

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Hearing this, the crocodile said happily, "Dear! If this is the case, then here do I take you back to the rose-apple tree now itself."

Having said so he went back to the root of the rose-apple tree. There, reaching out to the shore, the monkey swiftly climbed the tree and thought to himself, "Oh God! By sheer luck I have come to life again at present! Or else, this has been rightly said,

'One should not trust anybody,
Be him trustworthy or untrustworthy;
(For) the fear arising out of trust
Strikes hard even at the root (of hope)'

This day is therefore the day of my rebirth."

Seeing the monkey thus lost in deep thought, the crocodile said. "Oh Friend! Give me that heart of yours so that your sister-in-law may be appeased after eating it."

Thereupon, laughing and rebuking him, the monkey said, "You wicked betrayer! Does anybody have two hearts? Therefore go away from here now itself and never come here again. It has been rightly said,

